# अथ श्रीपादराजपञ्चरत्नमालिका

वन्दे श्रीपादराजं रुचितमहृदयं पूजितश्रीसहायं
निर्धूताऽशेषहेयं निभृतशुभचयं भूमिदेवाभिगेयम् ।
विप्रेभ्यो दत्तदेयं निजजनसदयं खण्डिताशेषमायं
निष्ठ्यूतस्वर्णकायं बहुगुणनिलयं वादिसङ्घैरजेयम् ॥१॥

क्षुभ्यद्वादिकरीन्द्रवादिपटलीकुम्भच्छटाभेदन–
प्रौढप्राभवतर्कसङ्घनिकरश्रेणीविलासोज्ज्वलः।
गोपीनाथमहेन्द्रशेखरलसत्पादस्थलावासकृत्
पायान्मां भवघोरकुञ्जरभयाच्छ्रीपादराट्केसरी ॥२॥

बिभ्राणं क्षौमवासः करधृतवलयं हारकेयूरकाञ्ची–
ग्रैवेयस्वर्णमालमणिगणखचितानेकभूषाप्रकर्षम् ।
भुञ्जानं षष्टिशाकं हयगजशिबिकानर्घ्यशय्यारथाढ्यं
वन्दे श्रीपादराजं त्रिभुवनविदितं घोरवादिप्रशान्त्यै ॥३॥

यद्वृन्दावनसेवया सुविमलां विद्यां पशून्सन्ततिं
ज्ञानाऽज्ञानमनल्पकीर्तिनिवहं प्राप्नोति सौख्यं जनः।
तं वन्दे नरसिंहतीर्थनिलयं श्रीव्यासराट्पूजितम्
ध्यायन्तं मनसा नृसिंहचरणं श्रीपादराजं गुरुम् ॥४॥

काशीकेदारमायाकरिगिरिमधुराद्वारकावेङ्कटेश–
श्रीमुष्णक्षेत्रपूर्वत्रिभुवनविलसत्पुण्यभूमीनिवासः।
गुल्मादिव्याधिहर्ता गुरुगुणनिलयो भूतवेतालभेदी
भूयाच्छ्रीपादराजो निखिलशुभततिप्राप्तये सन्ततं नः ॥५॥

॥इति श्रीव्यासराजविरचिता श्रीश्रीपादराजपञ्चरत्नमालिका॥